# ॥ केतुपञ्चविंशतिनामस्तोत्रम् ॥

केतुः कालः कलयिता धूम्रकेतुर्विवर्णकः ।
लोककेतुर्महाकेतुः सर्वकेतुर्भयप्रदः ॥ १ ॥

रौद्रो रुद्रप्रियो रुद्रः क्रूरकर्मा सुगन्धधृक् ।
पलाशधूमसंकाशश्चित्रयज्ञोपवीतधृक् ॥ २ ॥

तारागणविमर्दी च जैमिनेयो ग्रहाधिपः ।
पञ्चविंशतिनामानि केतोर्यः सततं पठेत् ॥ ३ ॥

तस्य नश्यति बाधा च सर्वकेतुप्रसादतः ।
धनधान्यपशूनां च भवेद् वृद्धिर्न संशयः ॥ ४ ॥

॥ इति श्रीस्कन्दपुराणे
केतोः पञ्चविंशतिनामस्तोत्रं संपूर्णम् ॥